No. २३९८ क

Title गणपतिमन्त्रन्यासः

Author

Extent २ पत्र Age

Subject तन्त्र

5850

F- 1

Complete

३५०

ॐश्रीगणेशायनमः ॐअस्यश्रीगणपतिमंत्रस्य श्रीब्रह्मऋषिः गाय
त्रीछंदः श्रीमहागणपतिर्देवता गंबीजं ह्रींशक्तिः नमःकीलकं ममनि

कामेश्वर कामेश्वर्यंगतेन

र्विघ्नश्रीविद्यासाधनार्थेजपेविनियोगः इतिकृतांजलिःसन्न्यसेत् ब्र
ह्मऋषयेनमःशिरसि गायत्रीछंदसेनमोमुखे श्रीमहागणपतिर्देवता
यैनमोहृदि गंबीजायनमोगुह्ये ह्रींशक्तयेनमःपादयोः नमःकील

कामेश्वरे कामेश्वर्यंगतेन

कायनमोनाभौ ममनिर्विघ्नश्रीविद्यासाधनार्थेजपेविनियोगः सर्वांगेषु
इतिऋष्यादिन्यासः अथकरन्यासः गांअंगुष्ठाभ्यांनमः गींतर्जनीभ्यां
स्वाहा गूंमध्यमाभ्यांवषट् गैंअनामिकाभ्यांहुं गौंकनिष्ठिकाभ्यांवौषट्
गःकरतलकरपृष्ठाभ्यांफट् इतिकरन्यासः अथषडंगन्यासः गांहृदयाय

ग॰ नमः गींशिरसेस्वाहा गूंशिखायैवषट् गैंकवचायहुं गौंनेत्रत्रयायवौषट्
ने॰ गः अस्त्रायफट् इतिषडंगन्यासः अथध्यानं ॐगजवदनमचिंत्यंतीक्ष्णदंतं
१ त्रिनेत्रं बृहदुदरमनंतंदंतमालेदधानम् परशुचषकपद्मंहंहस्तारविंदं
हरियुगलनिविष्टंश्रीगणेशंभजामि इतिध्यानं अथगायत्री गंतत्पुरुषा
यविद्महे वक्रतुंडायधीमहि तन्नोदंतीप्रचोदयात् १ मानसोपचारैःसंपू
जयेद्यथा लंपृथिव्यात्मकंगंधंगणपतयेसमर्पयामिनमः हंआकाशा
त्मकंपुष्पंसमर्पयामिनमः यंवाय्वात्मकंधूपंसमर्पयामिनमः रंवह्न्यात्म
कंदीपंसमर्पयामिनमः वंअमृतात्मकंनानानैवेद्यंसमर्पयामिनमः सं
सर्वात्मकंफलमूलतांबूलंसमर्पयामिनमः इतिमानसोपचारैःसंपूज्य

मूलमंत्रेणजपंकुर्यात् ह्रींगंह्रींगणपतयेनमः इतिमंत्रः जपांतेमालां
शिरसिसंस्थाप्य एवंवत्प्राणायामऋष्यादिकरषडंगन्यासध्यानांतेवि
धाय ॐत्वंमालेसर्वदेवानांप्रीतिदाशुभदाभव शुभंकुरुष्वमेभद्रेयशोवी
र्यंचसर्वदा इतिमालांशिरसिउत्तार्य रहःसंस्थाप्य ॐगुह्यातिगुह्यगोप्ता
त्वंगृहाणास्मत्कृतंजपं सिद्धिर्भवतुमेदेवत्वत्प्रसादाद्विनायक अनेनमं
त्रजाप्येनश्रीगणपतिदेवताप्रीयतांप्रीतोस्तु ॥